කැලණිය විශ්වවිද්‍යාලය - ශ්‍රී ලංකාව

දුරස්ථ සහ අඛණ්ඩ අධ්‍යාපන කේන්ද්‍රය

ශාස්ත්‍රවේදී (සාමාන්‍ය) උපාධි තෘතීය පරීක්ෂණය (බාහිර) - 2011/2012
2014 අප්‍රේල්/ මැයි/ ජූනි

මානවශාස්ත්‍ර පීඨය

සංස්කෘත- SANS- E3015

සංස්කෘත කාව්‍ය විචාරය හා නාට්‍ය විචාරය බෞද්ධ සංස්කෘත සාහිත්‍යය

පළමු ප්‍රශ්නයට හා තවත් ප්‍රශ්න හතරකට (04) පිළිතුරු සපයන්න.

ප්‍රශ්න සංඛ්‍යාව : 08 යි කාලය : පැය 03 යි

---

01. මෙහි දක්වා ඇති සංස්කෘත පාඨ අතරින් හතරක් (04) සිංහලයට පරිවර්තනය කරන්න.

I

अन्य धर्मस्ततोन्यत्र लोकसीमानु रोधिना ।
सम्यगाधीयते यत्र स समाधिः स्मृतो यता ॥
कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च ।
इति नेत्रक्रिया ध्यासा लल्ब्धा तद्वाचिनी श्रतिः ॥
निष्ठ्युतोद्गीणिवान्तादि शौणवृत्तिव्यपाश्रयम् ।
अतिसुन्दर मन्यत्र ग्राम्यकक्षां विगाहते ॥
पदमान्यकांशु निष्ठ्युताः पीत्वा पावकविपृषः ।
भूयोवमन्तीव मुखै रुद्गीर्णारुणरेणुभिः ॥
इति हृद्य महृद्यन्तु निष्ठीवति वधूरिति ।
युगपन्नैन्तकधर्माणा मध्यासश्च स्मृतो यथा ॥ (काव्यादर्श-I)

'यस्मिन्नस्ति न वस्तु किंचन मनःप्रह्लादि सालंकृति
व्युत्पन्नै रचितं च नैव वचनैर्वक्रोक्तिशून्यं च यत् ।
काव्यं तद्ध्वनिना समन्वितमिति प्रीत्या प्रशंसञ्जडो
नो विद्मोऽभिदधाति किं सुमतिना पृष्टः स्वरूपं ध्वनेः ॥'

भाक्तमाहुस्तमन्ये । अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः । यद्यपि च ध्वनिशब्दसंकीर्तनेन काव्यलक्षणविधायिभिर्गुणवृत्तिरन्यो वा न कश्चित्प्रकारः प्रकाशितः, तथापि गुणवृत्त्या काव्येषु व्यवहारं दर्शयता ध्वनिमार्गो मनाक्स्पृष्टो लक्ष्यत इति परिकल्प्यैवमुक्तम्—भाक्तमाहुस्तमन्ये इति ।

केचित्पुनर्लक्षणकरणशालीनबुद्धयो ध्वनेस्तत्त्वं गिरामगोचरं सहृदयहृदयसंवेद्यमेव समाख्यातवन्तः । तेनैवंविधासु विमतिषु स्थितासु सहृदयमनःप्रीतये तत्स्वरूपं ब्रूमः । तस्य हि ध्वनेः स्वरूपं सकलसत्कविकाव्योपनिषद्भूतमतिरमणीयमणीयसीभिश्चिरंतनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वम् । अथ च रामायणमहाभारतप्रभृतिनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्षयतां सहृदयानामानन्दो मनसि लभतां प्रतिष्ठामिति प्रकाश्यते ।

ध्वन्यालोकः

III

अथ बीभत्सो नाम जुगुप्सास्थायिभावात्मकः । स चाहृद्याप्रियाचोष्यानिष्टश्रवणदर्शनोद्वेजनकीर्तनादिभिर्विभावैरुत्पद्यते । तस्य च सर्वाङ्गसंहारमुखविकूणनोल्लेखननिष्ठीवनोद्वेजनादिभिरनुभावैरभिनयः प्रयोक्तव्यः । भावाश्चास्यापस्मारोद्वेगावेगमोहव्याधिमरणादयः ॥ ९४ ॥

अनभिमतदर्शनेन च गन्धरसस्पर्शदोषैश्च ।
उद्वेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति ॥ ९५ ॥

मुखनेत्रविकूणनया नासाप्रच्छादनावनमितास्यैः ।
अव्यक्तपादपतनैर्बीभत्सः सम्यगभिनेयः ॥ ९६ ॥

अथाद्भुतो नाम विस्मयस्थायिभावात्मकः । स च दिव्यजनदर्शनेप्सितमनोरथावाप्त्युपवनदेवकुलादिगमनसभाविमानमायेन्द्रजालसंभावनादिभिर्विभावैरुत्पद्यते । तस्य नयनविस्तारानिमेषप्रेक्षणरोमाञ्चाश्रुस्वेदहर्षसाधुवाददानप्रबन्धहाहाकारबाहुवदनचेलाङ्गुलिभ्रमणादिभिरनुभावैरभिनयः प्रयोक्तव्यः । भावाश्चास्य स्तम्भाश्रुस्वेदगद्गदरोमाञ्चावेगसंभ्रमहर्षचपलतोन्मादधृतिजडताप्रलयादयः ॥ ९७ ॥

नाट्यशास्त्र

मारबलॉबलकरणगतिः कुगणिगणपरप्रवादिसहधर्मनिग्रहणगतिः । तमःपटलक्लेशविधमनगतिः संसारपक्षापक्षकरणगतिः शक्रब्रह्ममहेश्वरलोकपालाभिभवगतिः त्रिसाहस्रमहासाहस्रैकशूरगतिः स्वयंभ्वनभिभूतगतिः, सर्वज्ञज्ञानाभिगमनगतिः स्मृतिमतिगतिः सुगतिगमनगतिः जरामरण-प्रशमनगतिः शिवविरजामलाभयनिर्वाणपुरगमनगतिः । ईदृश्या गत्या बोधिसत्त्वो बोधिमण्डं संप्रस्थितोऽभूत् ॥

इति हि भिक्षवो यावच्च नद्या नैरञ्जनाया यावच्च बोधिमण्डादेस्तस्मिन्नन्तरे वातबलाहकै-र्देवपुत्रैः संमृष्टमभूत् । वर्षबलाहकैर्देवपुत्रैर्गन्धोदकेन सिक्तमभूत् पुष्पैश्चावकीर्णमभूत् । यावदेव त्रिसाहस्रमहासाहस्रलोकधातौ वृक्षास्ते सर्वे येन बोधिमण्डस्तेनाभिनताग्रा अभूवन् । येऽपि च तदहोजाता बालदारिकास्तेऽपि बोधिमण्डशीर्षकाः स्वपन्ति स्म । येऽपि चेह त्रिसाहस्र-महासाहस्रलोकधातौ सुमेरुप्रमुखाः पर्वतास्तेऽपि सर्वे येन बोधिमण्डस्तेन प्रणता अभूवन् । नदीं च नैरञ्जनामुपादाय यावद्बोधिमण्डोऽस्मिन्नन्तरे कामावचरैर्देवपुत्रैः क्रोशविस्तारैकप्रमाणो मार्गो ऽभिव्यूहितोऽभूत् । तस्य च मार्गस्य वामदक्षिणयोः पार्श्वयोः सप्तरत्नमयी वेदिका अभिनिर्मिता-ऽभूत् । सप्ततालानुच्चैस्त्वेन उपरिष्टाद्रत्नजालसंछन्ना दिव्यछत्रध्वजपताकासमलंकृता इषुक्षेपे सप्तरत्नमयास्ताला अभिनिर्मिता अभूवन् तस्या वेदिकाया अभ्युद्गताः । सर्वस्माच्च तालाद्रत्नसूत्रा द्वितीये तालमवसक्तमभूत् ।

ललितविस्तर

V

ततश्च जानामि न एष मारो
  भूतां चरिं दर्शयि लोकनाथः ।
न ह्यत्र माराण गती हि विद्यते
  ममैव चित्तं विचिकित्सप्राप्तम् ॥ २० ॥

यदा तु मधुरेण गभीरवल्गुना
  संहर्षितो बुद्धस्वरेण चाहम् ।
तदा मि विध्वंसित सर्वसंशया
  विचिकित्स नष्टा च स्थितोऽस्मि ज्ञाने ॥ २१ ॥

निःसंशयं भेष्यि तथागतोऽहं
  पुरस्कृतो लोकि सदेवकेऽस्मिन् ।
संधाय वक्ष्ये इमु बुद्धबोधिं
  समादपेन्तो बहुबोधिसत्त्वान् ॥ २२ ॥

एवमुक्ते भगवानायुष्मन्तं शारिपुत्रमेतदवोचत्—आरोचयामि ते शारिपुत्र, प्रति-वेदयामि ते अस्य सदेवकस्य लोकस्य पुरतः समारकस्य सब्रह्मकस्य सश्रमणब्राह्मणिकायाः प्रजायाः पुरतः । मया त्वं शारिपुत्र विंशतीनां बुद्धकोटीनयुतशतसहस्राणामन्तिके परि-पाचितोऽनुत्तरायां सम्यक्संबोधौ । मम च त्वं शारिपुत्र दीर्घरात्रमनुशिक्षितोऽभूत् ।

सद्धर्मपुण्डरीकसूत्रम् ।

VI

मायोपमाज्जिनात् पुण्यं - सद्भावेपि कथं यथा
यदि मायोपमः सत्त्वः - किं पुनर् जायते मृतः

यावत् प्रत्यय सामग्रि - तावन्मायापि वर्तते
दीर्घ सन्तन मात्रेण - कथं सत्त्वोस्ति तत्त्वतः

माया पुरुष घातादौ - चित्तभावान्न पापकम्
चित्त माया समेते तु - पापपुण्यसमुद्भवः

मन्त्रादीना मसामर्थ्यान्न - माया चित्त सम्भवः
सापि नानाविधा माया - नाना प्रत्यय सम्भवा

බෝධිචර්යාවතාර

VII

तस्मादर्थस्य लाभार्थं[a] लब्धस्य परिरक्षणे[b] ।
दृढं कुर्यासि व्यायामं धर्मेण मनुजाधिप[c] ॥११३॥
यो वै भूमिपतिर्देव अधर्मेणानुशासति ।
राष्ट्रस्य[d] दुब्बलं[e] भोति च्छिद्रभूतं समन्ततः ॥११४॥
यो च भूमिपतिर्देव[f] धर्मेण[g] अनुशासति ।
राष्ट्रस्य[h] स्थावरं[i] भवति ऋद्धं[j] स्फीतं जनाकुलं ॥११५॥
निगृह्ले[k] निगृहीतव्यं प्रग्रहार्हां[l] च प्रगृह्ले ।
संगृह्ले[m] संगृहीतव्यां[n] अनुग्रहरुचिर्भव ॥११६॥
यो निग्रहं न जानाति[o] प्रग्रहं वा जनाधिपः ।
संग्रहानुग्रहं चापि सो अर्था परिहायति ॥११७॥

මහාවස්තුඅවදානය

02. කාව්‍යා දර්ශයේ දැක්වෙන දශ ප්‍රාණයන් පිළිබඳ විමසීමක් කරන්න.

03. අලංකාරවාදය අනෙකුත් විචාරවාදයන් අභිබවා යෑමට බලපෑ හේතූන් විස්තර කරන්න.

04. ශෘංගාර රසය පිළිබඳව විවරණයක් සපයන්න.

05. පහත සඳහන් වෘත්ත අතුරින් පහක ලක්ෂ්‍ය - ලක්ෂණ පැහැදිලි කරන්න.

I. මාලතී II. මාලනී III. තොටක IV. වසන්තතිලකා

V. මන්දක්‍රාන්තා VI. භුජංගප්‍රයාත VII. ස්‍රග්ධරා VIII. ආර්යාප්‍රථමාර්ධය

IX. විපුලා X. ජඝනචපලා

06. ලලිත විස්තරය බෝධි සත්ව චරිතය උත්කර්ෂයෙන් වර්ණනා කර ඇත. විමසන්න.

07. සද්ධර්ම පුණ්ඩරීක සූත්‍රයේ අන්තර්ගතය පිළිබඳව කෙටි හැඳින්වීමක් කරන්න.

08. බෝධිචර්යාවතාරය බෝධිසත්ව ශික්ෂණය පිළිබඳව රචනා වූ ග්‍රන්ථයකි. පරීක්ෂා කරන්න.

*************************************